कुल प्रश्नों की संख्या : **27**]
Total No. of Questions : **27**]

[कुल मुद्रित पृष्ठों की संख्या : **15**
[Total No. of Printed Pages : **15**

# C-232030

# विषय : संस्कृत
# Subject : Sanskrit

समय : **3** घंटे]
Time : **3** Hours]

[पूर्णांक : **80**
[Maximum Marks : **80**

**निर्देश** : (i) सर्वे प्रश्नाः समाधेयाः।

(ii) सुन्दरं स्पष्टञ्च लिखत।

(iii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

**प्रश्न–1.** 'इत्युक्त्वा' इति पदे कः सन्धिः वर्तते ? **1**

**प्रश्न–2.** 'आश्रमस्य पदम्' इत्यस्य सामासिक पदं लिखत। **1**

**प्रश्न–3.** 'जीवनकला' इति पदे कः समासः अस्ति ? **1**

**प्रश्न–4.** 'आदाय' इति पदस्य प्रकृतिं प्रत्ययं च पृथक् कुरुत। **½+½=1**

**प्रश्न–5.** गद्यपद्यमयं काव्यं ............. अभिधीयते। **1**

**प्रश्न–6.** संस्कृत भाषायाः प्रथमः उपन्यासकारः कः अस्ति ? **1**

**प्रश्न–7.** संस्कृतगद्यकाव्यस्य कति भेदाः ? **1**

**प्रश्न–8.** "नैकेनापि समं गता वसुमती" इति पाठः कस्माद् ग्रन्थात् सङ्कलितः ? **1**

**प्रश्न–9.** महाराणा प्रतापस्य अश्वस्य नाम किम् ? **1**

**प्रश्न–10.** "एकशरीर-संक्षिप्ता पृथिवी रक्षितव्या।" इति कः कथयति ? चित्वा लिखत : **1**

(अ) रामः

(ब) काञ्चुकीयः

(स) लक्ष्मणः

**प्रश्न–11.** अधोलिखितयोः वाक्यद्वयोः रेखाङ्कित-पदयोः समास-विग्रहं कृत्वा लिखत : **1+1=2**

(क) भार्गवस्य <u>आश्रम पदं</u> ददर्श।

(ख) <u>अतिथिदेवो</u> भव।

**प्रश्न–12.** अधोलिखितयोः वाक्यद्वयोः कोष्ठकान्तर्गतपदानां सामासिकरूपं लिखत : **1+1=2**

(क) महाराजः इति। आर्य! ननु ............... (वच् + तव्यत्)।

(ख) ............... (ज्ञानस्य उदधिः) अनन्तपारो गभीरश्च।

**प्रश्न–13.** महाकवि कालिदासस्य द्वयोः रचनयोः नाम्नी लिखत। **1+1=2**

**प्रश्न–14.** नाटकस्य परिभाषां स्वभाषया लिखत। **2**

**प्रश्न–15.** महाकाव्यस्य का अपि तिस्रः विशेषताः स्वभाषया लिखत। **1+1+1=3**

**प्रश्न–16.** अधोलिखितेषु वाक्येषु कोष्ठकात् उचितविभक्तिपदं चित्वा रिक्तस्थानानि पूरयत : **1+1+1=3**

(क) दिलीपस्य आगमः ............... सदृशः अस्ति। (प्रज्ञया / प्रज्ञायाः)

(ख) ............... वेदाः। (चतुर्णाम् / चत्वारः)

(ग) परिष्कृतपारदभस्म ............... दद्याम्। (त्वाम् / तुभ्यम्)

**प्रश्न–17.** अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत (केषाञ्चित् चतुर्णाम्)– **1×4=4**

तदन्वये शुद्धिमतिः प्रसूतः शुद्धिमत्तरः।
दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव।।

**प्रश्नाः**

(i) कीदृशे अन्वये दिलीपः प्रसूतः ?

(ii) कविषु राजेन्दुः कः कथितः ?

(iii) 'उत्पन्नः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iv) 'प्रसूतः' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(v) 'अशुद्धिमति' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**अथवा**

पुष्पं फलं तदनु गन्धवहः समीरः<br>
खद्योत-पंक्तिरमला च पिकालि-गीतिः।<br>
अद्यापि यत्र सरल-प्रकृति प्रणीतं<br>
पञ्चोपचारमिव पूजनमस्ति मातुः।।

**प्रश्नाः**

(i) कस्याः पूजनमस्ति ?

(ii) कीदृशः समीरः वहति ?

(iii) 'गन्धवहः समीरः' अनयोः पदयोः विशेषण पदं किम् ?

(iv) 'अस्ति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(v) 'वायुः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**प्रश्न–18.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत (केषाञ्चित् चतुर्णाम्)– **1×4=4**

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह–"त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्।" पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तुष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो बधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गुहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष।

पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह–''श्रीमता यदादिष्टं तत्साधितमिति।'' ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान् – ''वत्सराज ! खड्गप्रहारसमये तेन किमुक्तम् ?''

**प्रश्नाः**

(i) कस्य वचनमाकर्ण्य राजा कुपितः अभवत् ?

(ii) कुपितः राजा किं प्राह ?

(iii) 'श्रुत्वा' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iv) ''वत्सराजः तं न हतवान् ..............।'' अत्र 'तम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(v) 'असि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

**अथवा**

तत्रार्थ व्यवस्थितपादाः ऋचः। ताः सगीतयः सामानि। अच्छन्दांस्यगीतानि यजूंषि। ऋचो यजूंषि सामानि चाथर्वणं त इमे चत्वारो वेदाः। इतिहासवेदः, धनुर्वेदः, गन्धर्ववेदः आयुर्वेदः च उपवेदाः। ''वेदोप-वेदात्मा सार्ववर्णिकः पञ्चमो गेय वेदः।'' इति द्रौहिणिः। ''शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दोविचितिः, ज्योतिषं च षडङ्गानि इत्याचार्याः।'' उपकारकत्वादलङ्कारः सप्तममङ्ग'' इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः।

**प्रश्नाः**

(i) ऋचः कीदृश्यः भवन्ति ?

(ii) उपवेदाः के सन्ति ?

(iii) 'पञ्चमो गेयवेदः' अनयोः पदयोः विशेष्यपदं किम् ?

(iv) 'चरणाः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(v) 'गीतानि' इत्यस्य पदस्य विलोमपदं किं प्रयुक्तम् ?

**प्रश्न–19.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत (केषाञ्चित् चतुर्णाम्)– **1×4=4**

सन्यासी – कथमस्मान् सन्यासिनोऽपि कठोर भाषणैस्तिरस्करोषि ?

दौवारिकः – भगवन् ! सन्यासी तुरीयाश्रम सेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञाम् उल्लङ्घ्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।

सन्यासी – सत्यं क्षान्तोऽयमपराधः, परं सन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः। आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः।

दौवारिकः – सन्यासिन् ! सन्यासिन् ! बहूक्तम्, विरम न वयं दौवारिका ब्रह्मणः अप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति। न तु रात्रौ।

**प्रश्नाः**

(i) दौवारिकः कस्य आज्ञां शिरसा वहति ?

(ii) के किमपि न प्रष्टव्या ?

(iii) 'अयम् अपराधः' अनयोः पदयोः विशेषणपदं किम् ?

(iv) 'आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः'' अत्र प्रयुक्तम् अव्ययपदं लिखत।

(v) 'प्रतीक्षामहे' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

**अथवा**

लक्ष्मणः – (सक्रोधम्) कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां

स्वजननिभृतः सर्वोप्येवं मृदुः परिभूयते।

अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो

युवतिरहितं लोकं कर्तुं यतश्छालिता वयम्।।

सीता – आर्यपुत्र ! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः – सुमित्रामातः! किमिदम् ?

लक्ष्मणः – कथं कथं किमिदं नाम।

क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।

इदानीमपि संदेहः किं क्षमा निर्मनस्विता।।

**प्रश्नाः**

(i) लक्ष्मणः किं कर्तुं कृतनिश्चयः ?

(ii) रोदितव्ये काले केन धनुर्गृहीतम् ?

(iii) 'छलितावयम्' अनयोः पदयोः क्रियापदं किम् ?

(iv) 'संसारम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(v) 'मुञ्च' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

**प्रश्न–20.** अधोलिखितानां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत (केषाञ्चित् पञ्चानाम्)– **1×5=5**

(i) प्रजाओं का कल्याण हो।

(ii) विद्यालय के चारों ओर वृक्ष हैं।

(iii) राम के साथ सीता भी वन गयी।

(iv) नदियों में गंगा पवित्र है।

(v) श्री कृष्ण को नमस्कार।

(vi) मैं आरम्भ से सुनना चाहता हूँ।

**अथवा**

अधोलिखितानां वाक्यानां रेखाङ्कितपदानि शुद्धिं कृत्वा वाक्यानि पुनः लिखत (केषाञ्चित् पञ्चानाम्)–

(i) सः बालकौ पठतः।

(ii) एतत् फले मधुरे स्तः।

(iii) अनयोः बालकस्य नाम किम् ?

(iv) तेषु वृक्षे वानरः वसति।

(v) रामः सर्वे पुस्तकानि आनयति।

(vi) भवन्तः किं कर्तुम् इच्छति ?

(vii) 'रामायणम्' ज्ञानवर्धकः पुस्तकम् अस्ति।

**प्रश्न–21.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिविच्छेदं कुरुत – **1×4=4**

(i) स्नेहत्यागान्न शोच्यते।

(ii) मातेव रोदिति सखे! कुररी तु काचित्।

(iii) दीपस्य समीपम् आगत्य सन्यासिनोक्तम्।

(iv) पिता ह्यात्मनो जरां ज्ञात्वा विचारयामास।

**अथवा**

अधोलिखितेषु वाक्येषु रेखाङ्कितविच्छेदपदानां सन्धिं कुरुत –

(i) तदा गच्छ दुर्ग + अध्यक्षसमीपे।

(ii) एषा वेद + उपनिषत्।

(iii) जरामरणनाशार्थं प्रविष्टः + अस्मि तपोवनम्।

(iv) तावत् + मे सा प्रतीक्षा।

**प्रश्न–22.** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत– **1×5=5**

(i) अनेन मणिना छन्द .............. (प्र + नम् + ल्यप्) बहुशो नृपः।

(ii) ताम्रं सुवर्णं .............. (वि + धा + तुमुन्) शक्नुयाः।

(iii) परम् एकः उपायः अपि .............. (चिन्त् + क्त) मया।

(iv) हरिश्चन्द्रः पुत्रं जनसङ्कुले आपणे .............. (वि + क्री + क्तवतु)।

(v) .............. (विद्या + मतुप्) वस्तुत एव रूपम्।

**अथवा**

अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिं प्रत्ययं च पृथक् कुरुत–

(i) न शक्नोमि रोषं धारयितुम्।

(ii) प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(iii) स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना।

(iv) सिद्धोऽहं बलवान् सुखी।

(v) अपौरुषेयं श्रुतिः।

**प्रश्न–23.** अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत (केषाञ्चित् पञ्चानाम्)– **1×5=5**

(i) स्वाध्यायप्रवचनाभ्यां किं न कर्तव्यम् ?

(ii) नृणां वरः कः अस्ति ?

(iii) कैकेय्याः भर्त्ता केन समः आसीत् ?

(iv) दौवारिकस्य निष्ठा केन परीक्षिता ?

(v) केषां समाजे अपण्डितानां मौनं विभूषणम् ?

(vi) पिकालिगीतिः किमिव मातुः पूजनं करोति ?

**अथवा**

अधोलिखितानां वाक्यानां रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केषाञ्चित् पञ्चानाम्)–

(i) राज्ञा हस्तेन एव विसर्जितः।

(ii) दीपस्य समीपम् आगत्य सन्यासिना उक्तम्।

(iii) कांस्यम् अतितरां निनादं करोति।

(iv) मुञ्जः बह्नौ प्रवेशं निश्चितवान्।

(v) पुनः कालो वर्तते शेषः।

(vi) भूतेषु दया एव दैवीसम्पद्।

**प्रश्न–24.** स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न समागतौ। **2½+2½=5**

**अथवा**

अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वययोः मञ्जुषाप्रदत्तपदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयौ पुनः लिखत–

(अ) दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्।।

अन्वयः – हे पार्थ ! दम्भः (i) ................ अभिमानः च क्रोधः (ii) ................ एव च (iii) ................ च (इति) (iv) ................ सम्पदम् (v) ................ (लक्षणमस्ति)।

(ब) प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।।

अन्वयः – आसुराः (i) ................ प्रवृत्तिं च (ii) .............. च न (iii) ................ तेषु (आसुरीजनेषु) न (iv) ................ (विद्यते) न अपि च (v) ................ (विधते) न सत्यं विद्यते।

मञ्जुषा–

| |
|---|
| आचारः, शौचम्, जनाः, विदुः, अभिजातस्य, दर्पः, पारुष्यम्, आसुरीम्, अज्ञानम्, निवृत्तिम् |

**प्रश्न–25.** भवतः नाम सक्षमः अस्ति, छात्रावासे च भवान् वसति। अजन्ता एलोरा-गुहासु शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखिते पत्रे मञ्जुषातः उचितशब्दान् विचित्य रिक्तस्थानानि पूरयत– **½×10=5**

22-रङ्गनाघन् छात्रावासः

(i) ................

परमादरणीयाः (ii) ................

सादरं प्रणमामि,

सविनयं (iii) ................ यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम (iv) ................ शोभनानि अभवन्। अस्मिन् (v) ................ अहं गृहं न आगमिष्यामि यतः विद्यालयेन एकस्याः (vi) ................ प्रबन्धः कृतः। एषा यात्रा अजन्ता-एलोरा-गुहानां दर्शनाय आयोजिता अस्ति। यात्रायै (vii) ................ रुप्यकाणि प्रेषयन्तु भवन्तः।

शेषं सर्वं कुशलम्। मम (viii) ................ अग्रजाय च सादरं प्रणामाः।

भवदीयः (ix) ................

सक्षमः

330-अनन्तपुरम्

(x) ................

**मञ्जुषा**

| |
|---|
| चेन्नईनगरम्, निवेदयामि, प्रियपुत्रः, शैक्षिकयात्रायाः, पञ्चशतम्, कालिकातातः, शरदवकाशे, जनन्यै, उत्तर-पत्राणि, पितृमहाभागाः। |

**अथवा**

मञ्जुषायां प्रदत्तशब्दैः प्रधानाचार्यं प्रति अवकाशं ग्रहीतुं लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयत–

सेवायाम्,

(i) ................

सर्वोदय-वरिष्ठविद्यालयः

हरिद्वारम्

विषयः – (ii) ................ प्रार्थनापत्रम्।

(iii) ................

(iv) ................ निवेद्यते यत् मम भगिन्याः (v) ................ मार्चमासस्य अष्टाविंशत्यां (vi) ................ भविष्यति। मया च तत्र विवाहात् (vii) ................ अवश्यं गन्तव्यम्। अतः कृपया 26/03/2023 दिनाङ्कात् 28/03/2023 पर्यन्तं (viii) ................ दिवसानाम् अवकाशं (ix) ................ माम् अनुग्रह्णन्तु भवन्तः।

सधन्यवादम्

भवदीयः (x) ................

वरदराजः

**मञ्जुषा**

| |
|---|
| शिष्यः, प्रदाय, अवकाशाय, मान्याः, त्रयाणाम्, सादरम्, तारिकायाम्, विवाहः, दिनद्वयपूर्वम्, प्रधानाचार्याः। |

**प्रश्न–26.** मञ्जुषाप्रदत्तशब्दानांसहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत– **½×10=5**

गुरोः श्रीभक्तामलस्य समीपे एकः सत्पुरुषः (i) ................ प्रार्थयत्– "महाराज! अहं सदैव परेभ्यः क्रुध्यामि। (ii) ................ समाप्तेः कमपि उपायं सूचय।" महाराजः अवदत्– "सर्वप्रथमं तु अहम् एव यदि (iii) ................ भविष्यामि तदैव उपायं वदिष्यामि। अहं तु सर्वथा (iv) ................ न अस्मि।" परं सत्पुरुषः गुरुचरणौ स्पृष्ट्वा क्रोधनाशस्य उपायं प्रष्टुं सुदृढः अभवत्। गुरुः उवाच– "यदहं कथयामि तत् करिष्यति भवान्।" सत्पुरुषः (v) ................ प्रतिज्ञां कृतवान्। गुरुः अवदत्– "नित्य प्रातः गौशालां गच्छ, मौनः (vi) ................ गाः सेवस्व। गोः कण्ठं (vii) ................ स्पृश गोः शिशुभिः (viii) ................। भवतः क्रोधः अवश्यमेव (ix) ................ भविष्यति। यतः गोसेवकः सदैव (x) ................ भवति।

**मञ्जुषा**

| |
|---|
| शान्तः, अक्रोधी, आगत्य, निर्विकारः, तत्कर्तुम्, सन्, सस्नेहम्, शीलवान्, सह, क्रोधस्य। |

**अथवा**

दक्षिणात्ये जनपदे (i) ................ नाम नगरम्। तस्य निकटे एकः (ii) ................ आसीत्। तत्र चित्रग्रीवः कपोतराजः (iii) ................। एकदा कश्चित् व्याधः तत्र आगच्छत्। सः वृक्षस्य (iv) ................ जलं प्रसारयति। उपरि च (v) ................ क्षिपति। तण्डुलान् (vi) ................ आगताः कपोताः जाले बद्धाः अभवन्। सर्वे कपोताः मिलित्वा (vii) ................ सह उदपतन्। ते जालं नीत्वा मूषकराजस्य (viii) ................पार्श्वे अगच्छन्। सः तेषां (ix) ................ आसीत्। हिरण्यकः जालम् (x) ................ एवं कपोताः मुक्ताः अभवन्।

**मञ्जुषा**

| |
|---|
| मित्रम्, हिरण्यकस्य, भक्षयितुम्, अधः, विशालवृक्षः, महिलारोप्यम्, वसति स्म, जालेन, अकृन्तत्, तण्डुलकणान्। |

**प्रश्न–27.** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्त प्रश्नान् संस्कृतेन उत्तरत– **1×10=10**

सत्सङ्गतेः महिमानं को न जानाति। संसारे सज्जनाः अपि दुर्जनाः अपि सन्ति। दुर्जनस्य सङ्गतिं कोऽपि कर्तुं न इच्छन्ति। अपरत्र सत्सङ्गं बिना मानवस्य जीवनम् एव दुर्जीवनं भवति। वस्तुतः सत्सङ्गतिः जनानां पोषिका, कुसङ्गतिश्च नाशिका। सर्वे जनाः स्वपोषमेव इच्छन्ति विनाशं तु न इच्छन्ति। अतः सत्सङ्गतिः एव श्रेयसी। सज्जनाः तु स्वगुणैः एव सन्तः कथ्यन्ते। अत एव जनाः सज्जनानां गुणेभ्यः स्पृहयन्ति। सद्गुणेनैव जनः मनसा वाचा कर्मणा स्वस्थो भवति। तेन तस्य आयुः वर्धते, यशः अपि सततं वर्धते। को न जानाति यत् सर्वेषां देशानां महापुरुषाः अपि सत्सङ्गत्या श्रेष्ठां पदवीं प्राप्नुवन्। उक्तं हि भवभूतिना– "सत्सङ्गजानि निधनान्यपि तारयन्ति।"

**प्रश्नाः**

(1) सत्सङ्गतिं बिना जीवनं किं भवति ?

(2) कुसङ्गतिः कीदृशी ?

(3) सन्तः कैः सज्जनाः कथ्यन्ते ?

(4) संसारे कीदृशाः जनाः सन्ति ?

(5) भवभूतिना किम् उक्तम् ?

(6) महापुरुषाः केन श्रेष्ठां पदवीं प्राप्नुवन् ?

(7) 'कुसङ्गतेः' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(8) "जनाः गुणेभ्यः स्पृहयन्ति।" अत्र कर्तुः वचनं किम् ?

(9) 'अलभन्त' इत्यर्थे अत्र गद्यांशे किं पदं प्रयुक्तम् ?

(10) 'श्रेष्ठां-पदवीम्' अनयोः पदयोः विशेषण-पदं किम् ?

**अथवा**

एकः अतिदुष्टः वानरः आसीत्। प्रतिदिनं सः यथाशक्ति वृक्षे स्थितान् पक्षिणः तुदति स्म। उपनीडं गत्वा तेषां श्रमस्य उपहासं करोति स्म। एकः पक्षी अवदत् – "भोः! किमर्थम् उपहससि ? अनुवृष्टिः नीडम् एव अस्मान् रक्षति। वयं परिश्रमं कुर्मः, निर्विघ्नं च जीवामः। वानरः साट्टहासम् अवदत् – "मूर्खाः यूयम्। अरे! योगिनां कुतः गृहम् ?" एवं कथयित्वा तेन दुष्टेन पक्षिणां नीडानि भग्नानि। एकः पक्षी अवदत् – "योगिनः प्रतिजीवम् उपकारमेव कुर्वन्ति। किमिदम् अनुरूपं साधुजनस्य ? इदं कार्यं कृत्वा त्वम् असाधुः निर्लज्जः इव प्रतिभासि। संसारे कर्मणामेव महत्वं वर्तते। न तु रूपस्य। उत्तमं रूपं तु धृत्वा असाधवः राक्षसाः जनान् तुदन्ति पीडयन्ति च। तव कार्यम् एव तव लक्षणं वर्तते।"

**प्रश्नाः**

(1) कः पक्षिणः तुदति स्म ?

(2) अनुवृष्टिः किं खगान् रक्षति ?

(3) जनान् के तुदन्ति ?

(4) संसारे केषां महत्वं वर्तते ?

(5) वानरः साट्टहासं किम् अवदत् ?

(6) केन पक्षिणां नीडानि भग्नानि ?

(7) 'शक्तिम् अनतिक्रम्य' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(8) 'तेन-दुष्टेन' इत्यनयोः पदयोः विशेषणपदं किम् ?

(9) 'कुर्वन्ति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(10) 'आलयः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?